S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



सुखं, यथासुखं; निकामं; 'I can't sleep c. even at night' रात्रावपि निकामं शयितव्यं नास्ति (S. 2). **-er,** *s.* आश्वासकः, संतोषदः, शोकापहर्तृ *m.*, सांत्ववादः. **2** और्णं कंठावगुंठनं. **-less,** *a.* निरानंद, सुखरहित, संतोषहीन.

**Comic, Comical,** *a.* हासजनक, हासकर (री *f.*), हास्योत्पादक. **2** अपरूप, असंगत, **-ity, -alness,** *s.* हास्यता, कौतुकं; अपरूपता.

**Comity,** *s. See* **Civility.**

**Comma,** *s.* स्वल्पविरामः.

**Command,** *v. t.* आज्ञा c. (आज्ञापयति) आदिश् 6 P, व्या-सं-समा-°, विधा 3 U, शास् 2 P, नियुज् 7 A, 10. **2** अधिष्ठा 1 P, अध्यास् 2 A; ईश् 2 A, प्रभू, (with gen.); 'Râkshasas c. ed by 2 chieftains' नायकाभ्यामधिष्ठिता राक्षसाः. **3** नियम् 1 P, निग्रह् 9 P; *See* **Control. 4** आत्मवशं नी 1 P, स्वायत्तीकृ 8 U. **5** अवलोक् 10; 'sitting at a window c. ing (the view of) a well' दीर्घिकावलोकनगवाक्षगता (M. 1); 'good forms c. respect' आकृतिविशेषेष्वादरः पदं करोति (M. 1); पदं हि सर्वत्र गुणैर्निधीयते (R. III. 62) 'c. notice or attention.' **-s.** आदेशः, निदेशः, शासनं, नियोगः. **2** अधिकारः, प्रभुत्वं, आधिपत्यं, अधिष्ठातृत्वं; 'has Rákshasas under his c.' तस्यादेशमनुवर्तमाना राक्षसाः or स राक्षसानामधिपतिः-नायकः-अधिष्ठाता; 'at c.' वशेस्थित, *a.*; 'under one's c.' वशीकृत, स्वाधीन; 'to the c. of the army' सैनापत्ये; 'bring under one's c.' आत्मवशं नी, स्वाधीन *a.* कृ; 'though I have no c. over language' तनुवाग्विभवोपि सन् (R. I. 9); 'who has perfect c. over language' यं वाग्वश्येवानुवर्तते (U. 1). **-ant, -er,** *s.* आज्ञापकः, आदेष्टृ *m.* **2** पतिः, अध्यक्षः, नायकः, नीः in comp.; c. of an army' चमूपतिः, सेनानीः, सेनाध्यक्षः. **er-in-chief,** सेनापतिः, सेनाध्यक्षः. **-ment,** *s.* आज्ञा, विधिः, सूत्रं. **2** चोदना, शास्त्र-धर्म. आज्ञा.

**Commemorate,** *v. t.* स्मरणार्थं उत्सवं कृ 8 U. or आचर् 1 P; संकृत् 10, संस्मृ c., वर्ण् 10. **-ion,** *s.* उत्सवकरणं, स्मरणोत्सवः; 'in c. of' स्मरणार्थं, समुद्दिश्य. **-ive,** *a.* स्मारक, स्मरणकृत्.

**Commence,** *v.* आ-प्रा-रभ् 1 A, प्र-उप-क्रम् 1 A, प्रवृत् 1 A, व्यवसो 4 P. **2** अनुष्ठा 1 P, प्रस्तु 2 U. **-ment,** *s.* आरंभः, उपक्रमः, प्रस्तावः, मुखं, आदि *m.* **2** आमुखं, प्रस्तावना (in dramas). **3** अनुष्ठानं, प्रवृत्ति *f.*, प्रवर्तनं; 'from the c.' आमूलात्, आदितः.

**Commend,** *v. t.* प्रशंस् 1 P, स्तु 2 U, श्लाघ् 1 A, कृत् 10, वर्ण् 10. **2** सम्-ऋ c. (अर्पयति), हस्ते निक्षिप् 6 P, अधीन *a.* कृ 8 U; 'thy speech does not c. itself to me' त्वद्वचो नाभिनंदामि (S. 2). **-able,** *a.* प्रशस्य, श्लाघ्य, स्तुत्य. **-ation,** *s.* श्लाघा, प्रशंसा, स्तुति *f.* **-atory,** *a.* श्लाघासूचक, प्रशंसाकर (री *f.*), स्तुतिद्योतक. **-er,** *s.* प्रशंसकः, स्तावकः.

**Commensurate,** *v. t.* अनुरूप-अनुगुण-*a.* कृ 8 U. **2** अपवृत् c. **-a., -Commensurable,** *a.* अनुरूप, अनुगुण, सदृश (शी *f.*), सम, तुल्य. **2** सापवर्त.

**Comment,** *v. i.* व्याकृ 8 U, व्याचक्ष् 2 A, विवृ 5 U, भाष्यं लिख् 6 P. **2** निरूप् 10, चर्चां कृ, परीक्ष् 1 A, अनुसंधा 3 U. **-ary,** *a.* टीका, व्याख्या, वृत्ति *f.*, भाष्यं. **2** निरूपणं, परीक्षणं, चर्चा. **-ator, -er,** *s.* भाष्यकृत्-कारः, व्याख्यातृ *m.*, टीकाकारः-कृत्.

**Commentitious,** *a.* कृत्रिम, काल्पित.

**Commerce,** *s.* वाणिज्यं, क्रयविक्रयः, निगमः. **2** व्यवहारः, संगमः-ति *f.*, संसर्गः. **-v. i.** वाणिज्यं कृ 8 U, पण् 1 A, व्यवहृ 1 P. **-ial,** *a.* वाणिज्य-विषयक-संबंधिन्; 'c. people' वाणिज्यपरायणा नराः.

**Commination,** *s. See* **Curse, Threat.**

**Commingle,** *v. t.* संयुज् 7 U, 10, संमिश्र् 10, एकीकृ 8 U, संकॄ 6 P; *See* **Unite.**

**Comminute,** *v. t.* चूर्ण् 10, पिष् 7 P, क्षुद् 7 U. **-ion,** *s.* चूर्णनं, पेषणं, क्षोदः.

**Commiserate,** *v. t.* दय् 1 A, (with gen.), अनुकंप् 1 A. **-ion,** *s.* दया, अनुकंपा, करुणा. **-ive, Commiserable,** *a.* करुणात्मक, अनुकंपाशील, सदय, दयार्द्र.

**Commissary,** *s.* सैन्यानां भोजनादि परिकल्पकः **2** *See* **Deputy. -Commisariat,** *s.* सैन्यानां भोजनाद्यधिकारः. **2** सैन्यानां भोजनाद्यधिकृतः.

**Commit,** *v. t.* कृ 8 U, आचर् 1 P, अनुष्ठा 1 P, वि-धा 3 U. **2** (Entrust) ऋ c. (अर्पयति), न्यस् 4 P, निक्षिप् 6 P. **3** नियुज् 7 A, 10, समादिश् 6 P, प्रतिपद् c.; 'c. to memory' कंठस्थ *a.* कृ; अभ्यस् 4 U; 'c. to prison,' कारागारे प्रविश् c., आसिध् 1 P; 'c. to writing' अभिलिख् 6 P, लेख्यं-पत्रं आरुह् c. (पत्रमारोप्य दीयतां प्रत्यवेक्षितं कर्म S. 6), पत्रे निविश् c. (पत्रे निवेशितमुदाहरणं प्रियायाः V. 2), पत्रे ऋ c. **-tal,** *s.* आचरणं, करणं, अनुष्ठानं. **-tee,** *s.* कार्यसंपादिका सभा, नियुक्तजनाः. **-ment,** *s.* आसेधः, निरोधः, काराप्रवेशनं. **-Commission,** *s.* आचरणं, करणं. **2** समर्पणं, निक्षेपः, न्यासः. **3** नियोगः, व्यापारः, अधिकारः. **4** आज्ञा-शासन-पत्रं, आदेशः. **5** परार्थ-विक्रयः. **6** नियुक्तजनाः; 'c. in the

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007